
# 6 विनोदपद्यानि

(1) सदा वक्री सदा क्रूरः सदा पूजामपेक्षते ।
कन्या राशिस्थितः नित्यं जामाता दशमो ग्रहः ।।

(2) टका धर्मः टका कर्म टका हि परमं तपः ।
यस्य हस्ते टका नास्ति हाटके टकटकायते ।।

(3) घटं भिन्द्यात् पटं छिन्द्यात् कुर्याद्रासभारोहणम् ।
येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत् ।।



(4) उष्ट्राणां हि विवाहेषु गीतं गायन्ति गर्दभाः ।
परस्परं प्रशंसन्ति अहो रूपम् ! अहो ध्वनिः ।।

(5) कन्या वरयते रूपं माता वित्तं पिता श्रुतम् ।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ।।

(6) वैद्यराज नमस्तुभ्यं यमराजसहोदर ।
यमस्तु हरति प्राणान् वैद्यः प्राणान् धनानि च ।।

## Glossary

**वक्री** not straightforward **जामाता** son-in-law **हाटके** in the market **रासभः** donkey **कन्याराशि-स्थितः** born in the virgo, remaining in the group of girls **गर्दभः** donkey **उष्ट्रः** camel **वित्तम्** wealth **सहोदरः** real brother **टका** (here)rupees **टकटकायते** wanders **भिन्द्यात्** should break **छिन्द्यात्** should cut **पटम्** cloth **श्रुतम्** knowledge

## विशेषः

**कुर्याद्रासभरोहणम्** – कुर्यात् रासभ–रोहणम् **कुलमिच्छन्ति** – कुलम् इच्छन्ति **मिष्टान्नमितरे** – मिष्टान्नम् इतरे

## Exercise

**1. Pronounce the following words properly :**

कन्याराशिस्थितो, पूजामपेक्षते, टकटकायते, भिन्द्यात्, कुर्याद्रासभरोहणम्, उष्ट्राणाम्, प्रशंसन्ति, कुलमिच्छन्ति, मिष्टान्नमितरे, नमस्तुभ्यम् ।

**2. Split Sandhi of the following words :**

पूजामपेक्षते, कुलमिच्छन्ति, मिष्टान्नमितरे

**3. Join the following words :**

कः + अपि    यमः + तु    नमः + तुभ्यम

**4. Complete the following shlokas :**

(1) सदा वक्री ______________________

______________________ दशमो ग्रहः ।।

(2) कन्या वरयते ______________________

______________________ जनाः ।।

**5. Copy out the following words :**

भिन्द्यात्, प्रशंसन्ति, नमस्तुभ्यम्, उष्ट्राणाम् ।

**6. Frame the new sentences replacing the underlined words given in the brackets :**

(1) सदा <u>पूजाम्</u> अपेक्षते । (धनम्, सुखम्, सम्मानम्)

(2) कुर्यात् <u>रासभे</u> आरोहणम् । (अश्वे, गजे, बलिवर्दे )

(3) बान्धवाः <u>कुलम्</u> इच्छन्ति (धनम्, वस्त्रम्, विद्याम्)

## Activity

- Present the shlokas given here in the school programme.
- Discuss the fun reflecting from the given shlokas.
- Collect such type of shlokas and present them in the class-room.

## ज्ञातव्यम्

### षोडश संस्काराः

| | | | |
|---|---|---|---|
| (1) | गर्भाधानम् | (9) | चूडाकर्म |
| (2) | पुंसवनम् | (10) | विद्यारम्भः |
| (3) | सीमन्तः | (11) | उपनयनम् |
| (4) | जातकर्म | (12) | वेदारम्भः |
| (5) | नामकरणम् | (13) | केशान्तः |
| (6) | कर्णवेधः | (14) | समावर्तनम् |
| (7) | निष्क्रमणम् | (15) | विवाहः |
| (8) | अन्नप्राशनम् | (16) | अन्त्येष्टिः |

### सप्तर्षयः

- कश्यपः, गौतमः, अत्रिः, जमदग्निः, भारद्वाजः, वशिष्ठः, विश्वामित्रः च सप्त ऋषयः सन्ति ।